शास्त्री-III

रूपसत्राध्यायः

25.09.20

1

आदौ नक्षत्रपुरुषस्याङ्गविभागं तन्नक्षत्रावस्थितिं चाह —

पादौ मूलं जङ्घे च रोहिणी जानुनी तथाश्विन्यः।
ऊरु चाषाढाद्वयमथ गुह्यं फल्गुनीद्वितयम् ॥
कटिरपि च कृत्तिका पार्श्वयोश्च यमला भवन्ति भद्रपदाः।
कुक्षिस्था रेवत्यो विज्ञेयमुरोऽनुराधा च ॥
पृष्ठं वृद्धि धनिष्ठा भुजौ विशाखा स्मृतौ करौ हस्तः।
अङ्गुल्यश्च पुनर्वसुराश्लेषासंज्ञिताश्च नखाः ॥
ग्रीवा ज्येष्ठा श्रवणं श्रवणौ पुष्यो मुखं द्विजाः स्वातिः।
हसितं शतभिषगथ नासिका मघा मृगशिरो नेत्रे ॥
चित्रा ललाटसंस्था शिरो भरण्यः शिरोरुहाश्चार्द्रा।
नक्षत्रपुरुषकोऽयं कर्तव्यो रूपमिच्छद्भिः॥

नक्षत्रपुरुष के दोनों पाँव में मूल, दोनो जङ्घाओं में रोहिणी, दोनों जानुओं में अश्विनी, दोनो ऊरुओं में पूर्वाषाढ़ा और उत्तराषाढ़ा, गुह्य में पूर्वाफाल्गुनी और उत्तरफाल्गुनी, कमर में कृत्तिका, दोनों पार्श्व में पूर्वभाद्रपदा और उत्तरभाद्रपदा, पेट में रेवती, छाती में अनुराधा, पीठ में धनिष्ठा, दोनों भुजाओं मे विशाखा, दोनों हाथों में हस्त, अंगुलियों में पुनर्वसु, नखों में आश्लेषा, ग्रीवा में ज्येष्ठा, दोनों कानों में श्रवण, मुख में पुष्य, दाँतो में स्वाति, हास्य में शतभिषा, नासिका में मघा, दोनों आँखो में मृगशिरा, ललाट में चित्रा, शिर में भरणी तथा केशों में आर्द्रा को स्थापित करना चाहिये।

P.T.O

कस्मिन् काले उपसत्राख्यं व्रतं गृहीतव्यमित्येतदाह —

चैत्रस्य बहुलपक्षे ह्यष्टम्यां मूलसंयुते चन्द्रे ।
उपवासः कर्तव्यो विष्णुं सम्पूज्य विधिवच्च ॥

चैत्र शुक्ल अष्टमी में यदि मूल नक्षत्र और चन्द्रवार हो तो उस दिन विष्णु और नक्षत्र की पूजा करके प्रथम उपवास प्रारम्भ करके जैसे-जैसे रोहिणी आदि आता जाय वैसे-वैसे आर्द्रा तक उपवास करना चाहिये ।

चैत्रमासस्य बहुलपक्षे कृष्णपक्षे अष्टम्यां तिथौ मूलसंयुते चन्द्रे चन्द्रवासरे । मूलं नक्षत्रं तत्र यदि भवति तस्मिन् दिने प्रथमत उपवासः कर्तव्यः विष्णुं नारायणं विधिवत् नक्षत्रं च सम्पूज्याभ्यर्च्य, ततो यथा यथा रोहिण्यादीनि नक्षत्राणि भवन्ति तथा तथोपवासः कर्तव्यो यावदार्द्राम् । तथा च गर्गः —

अष्टम्यां मघुमासस्य कृष्णपक्षे तु नैर्ऋते ।
नक्षत्रे चन्द्रवारे च मुहूर्ते च गुणान्विते ॥
प्रारम्भेऽनुपसत्राख्यं व्रतं धर्मात्मकः पुमान् ।
येन पूर्णेन मनुजो रूपशोभामवाप्नुयात् ॥

अथ व्रतार्थे कर्तव्यं तदाह

दद्याद् व्रते समाप्ते घृतपूर्णं भाजनं सुवर्णयुतम् ।
विप्राय कालविधुने सरत्नवस्त्रं स्वशक्त्या च ॥

व्रत समाप्त होने के बाद अपनी शक्ति के अनुसार कालज्ञ ब्राह्मण के लिए सुवर्ण, रत्न और वस्त्रों के साथ घृत से पूर्ण पात्र दान करना चाहिये ।

P.T.O

अथ स्त्री कीदृशी भवति —

शरदमलपूर्णचन्द्रद्युतिसदृशमुखी सरोजदलनेत्रा ।
रुचिरदशाना सुकर्णा भ्रमरोदरसन्निभैः केशैः ॥
पुंस्कोकिलसमवाणी ताम्रोष्ठी पद्मपत्रकरचरणा ।
स्तनभारानतमध्या प्रदक्षिणावर्तया नाभ्या ॥
कदलीकाण्डनिभोरु सुश्रोणी वरककुन्दरा सुभगा ।
सुश्लिष्टाङ्गुलिकाढ्या भवति प्रमदा मनुष्यश्च ॥

यदि पूर्वोक्त व्रत को स्त्री करे तो शारदीय चन्द्र के समान मुखकान्ति, कमलदल के समान नेत्र, सुन्दर दाँत, सुन्दर कान, भ्रमरोदर के समान केश, पुंस्कोकिल के समान वाणी, ताम्र वर्ण के समान ओंठ, कमल के समान हाथ और पाँव, स्तनो के भार से नत मध्य भाग, दक्षिणावर्त नाभियों से युत, केले के खम्भे के समान उरु, सुन्दर नितम्बकूप, स्वामीप्रिया और मिली हुई अँगुलियों से युत पाँव वाली होती है। इसी तरह इस व्रत को करने से पुरुष भी होता है।

शरदमलपूर्णचन्द्रद्युतिसदृशमुखी, शरत्काले योडशकलो निर्मलः, पूर्णचन्द्रः शशी, तस्य द्युतिः कान्तिः। तत्सदृशं मुखं वदनं यस्याः। सरोजदलनेत्रा पद्मपत्रसदृशाक्षी। रुचिरदशाना सुशोभनशुक्लदन्ता। सुकर्णा शोभनकर्णा। केशैर्मूर्धजैर्भ्रमरोदरसन्निभैर्द्विरेफजठरकान्तिभिः। अतिनीलवर्णैरित्यर्थः।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।